M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref. / Ser. 1133

Title: Rudra Niyas

1133
a

Complete

C

Rudra Viyas : Title

: Author

: Editor

Sk : Year, Vols.

: Publisher

1133a : Remarks

श्रीगणेशायनमः अथातः पंचांगरुद्राणां न्यासपूर्वकं जपहोमार्चनविधिं व्याख्यास्यामः याते रुद्रेति शिखा
यां अस्मिन्महत्यर्णवइति शिरसि सहस्राणीति ललाटे हंसः शुचिषदिति भ्रुवोर्मध्ये त्र्यंबकमिति नेत्रयोः
नमस्कृत्यायेति कर्णयोः मानस्तोके इति नासिकायां अवतत्येति मुखे नीलग्रीवा इति कंठे नमस्ते अस्त्वायुधायेति बाह्वोः
याते हेतिरित्युपबाह्वोः ये तीर्थानीति हस्तयोः सद्योजातमिति पंचानुवाकान् पंचस्वंगुलीषु नमोवः किरिकेभ्य इति हृदि
नमो गणेभ्य इति पृष्ठे नमो हिरण्यबाहव इति पार्श्वयोः विज्यं धनुरिति जठरे संसृष्टमिति जंघयोः विष्वंभूतमिति
गुल्फयोः हिरण्यगर्भ इति नाभौ मीढुष्टमेति कट्यां ये भूतानामधिपतय इति गुह्ये सशिरा जातवेदाः इत्यपाने मा
नो महांतमिति ऊर्वोः एष ते इति जान्वोः अध्वपथामिति पादयोः अध्यवोचदिति कवचं नमो बिल्मिने इत्युपकवचं नमो अस्तु नील
ग्रीवायेति तृतीयनेत्रं प्रमुंच धन्वन इत्यस्त्रं य एतावंतश्चेति दिग्बंधः ॐ नमो भगवते रुद्रायेति नमस्कारं न्यसेत् ॐकारं
मूर्ध्नि विन्यस्य नं नासिकाग्रे मों ललाटे भं मुखे गं कंठे वं हृदि तें दक्षिणहस्ते रुं वामहस्ते द्रां नाभौ यं पादयोः सद्योजातं
पादयोः वामदेवायेति ऊरुमध्ये अघोरं हृदि तत्पुरुषायेति मुखे ईशानं मूर्ध्नि हंसहंसेति० त्रातारमिंद्र० त्वंनो
अग्ने० सुगं नः पंथा अस्तु त्वं तं तत्त्वायामि आनोनियुद्भिः वयं सोम० तमीशानं अस्मे रुद्रा० स्योना पृथिवी० एतत्तेपु
मिंद्रादीदिक्षु० मनोज्योतिः० अबोध्यग्निः मूर्धानं० मर्माणिते० जातवेद इति गुह्योपस्थहृदयमुखशिरःस्वाहेति
मंत्र आत्मरक्षा कर्त्तव्या । शिवसंकल्पं हृदयं पुरुषसूक्तं शिरः उत्तरनारायणं शिखा अप्रतिरथं कवचं शतरु
द्रियं अस्त्राय फट् पंचांगसकृज्जपे दष्टांगन्यासं हिरण्यगर्भः यः प्राणतो ब्रह्मजज्ञानं महीयो रुपस्था
सयः अग्नेनय पात्रे यथावस्थो हृतासि आत्मानं रुद्ररूपं ध्यायेत् शुद्धस्फटिक० तातोपुजनमारभेत्
अभिषेके तु षडंगन्यासः कार्यः १ अथातो रुद्रस्नानार्चनविधिं व्याख्यास्यामः आदित एव तीर्थे स्नात उदेत्य शु

क्षेत

रुद्रन्या॰ त्रि:प्रयतोब्राह्मणचारी शुक्लवासा स्तस्य दक्षिणप्रत्यग्देशे तन्मुखवस्थितं रुलाम निदेवता स्थापयेत् प्रज्ञलनेब्रह्मातिष्ठतु स्था

१ स्थानानि तिष्ठन्तु मौ ॐ रक्षन्तु॰ आग्नेये दाचिश्रित इति प्रथमाक्रियामगानि संस्पृश्य अथैनं गंधैर्पुष्पैर्धूपदीपै रात्मा

नं प्रसाराधयेत् आराधितो॰ ध्यायेत् त्र्यंबकं यजामहे॰ इत्यनेन मावाहयेत् आवाहन्तु॰ शर्वो प्रसावाह्य सद्योजातं प्रपद्या

मीशायाहनं ददाति॰ सद्योजाताय वैनमोनमः इत्यासनं भवेभवेनातिभवे॰ स्वचमा इतिपाद्यं भवोद्भवायनमः इत्यर्घं॰

मीशायाहनं ददाति॰ (sic)

अद्भिर्गाभिरद्भिस्तर्पयंति भवं देवं तर्पयामि शर्वं देवं॰ ईशानं देवं॰ पशुपतिं देवं॰ रुद्रं देवं॰ उग्रं देवं॰ भीमं॰ महां

तं देवं॰ तर्पयित्वा ज्येष्ठायनम आचमनीयं श्रेष्ठायनमः मधुपर्कं॰ कालायनमः गंधं॰ कलविकरणायनमः पुष्पंस

र्वभूतदमनायनमः धूपं मनोन्मनायनमः इतिदीपं भवोद्भवायनमः इतिनैवेद्यं दद्यात् यथाशक्ति मित्रै रसैः पुष्पा

गिरदानि भवोद्भवायनमः शर्वाय॰ पर्वं नम अघोरेभ्य इत्युपतिष्ठेत॰ हिरण्यगर्भाद्धृ कलशेन संततधाराभिर्निषेचेत् का

दध्ना मधुना सर्पिषा पयसा चेक्षुरसेन नारिकेलोदकेन वाम्ररसेन तदलाभे उदकेनवा॰ नमस्तेरुद्रमन्यव इत्येकादशा

नुवाकांते अस्याविहित इत्येकादशानामनुवाकानामेकमेकं जपेत् सर्वेषांपारे पुनराराधनेनोदकं तदेवाद्भिर्धानं प्रोक्तं तेनाभि

षिक्तोदकेन अर्थी श्रद्धा मिमनुवाकेनाद्भिर्गाभिरद्भिश्च आपादात्स्नातः स्यात् पापक्षयार्थी व्याधिविमोचनार्थी श्रीकामः

शांतिकामः पुष्टिकामो मोक्षार्थी चकुर्याद्देवं कुर्वन् सिद्धिमाप्नोति आचार्याय दक्षिणां दद्यात् दशगाः सवत्साः स्वर्ण

भूषिता इत्येकादश तदलाभे एकां गां दद्यात् इत्याह भगवान् बोधायन इति सत्यं